भगवद्रामानुजाचार्यविरचितः

नित्यग्रन्थः



संस्कृत संशोधन संसत्

Bhagavad Rāmānuja Granthamālā
NITYAGRANTHA
Academy of Sanskrit Research
Melkote - 571 431

Chief Editor
Dr. Prof. Bhashyam Swamy *M.A. Ph.D., D.Litt.*
Director & Joint Secretary
Academy of Sanskrit Research
Melkote - 571 431

Publisher
Academy of Sanskrit Research
Melkote - 571 431

ISBN : 978-81-85929-84-2

First Edition : 2009
Copies : 500

PRICE : Rs. 90.00

Typeset & Printed at :
Academy of Sanskrit Research
Melkote - 571 431
Karnataka

भगवद्रामानुजग्रन्थमाला
नित्यग्रन्थः
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रधानसम्पादकः
डा.प्रो. भाष्यम् स्वामी, *एम्.ए. पिहेच्.डि., डि.लिट्*
निर्देशकः सहकार्यदर्शी च
संस्कृत-संशोधन-संसत्, मेलुकोटे

प्रकाशनम्
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१

प्रथमसंस्करणम् - २००९
प्रतयः - ५००
मूल्यम् - ९०.००

अक्षरसंयोजनम् - मुद्रणञ्च
संस्कृत-संशोधन-संसत्
यादवाद्रिः (मेलुकोटे) - ५७१ ४३१
कर्नाटक

Academy of Sanskrit Research series - 59

NITYAGRANTHA

of

Bhagavad Rāmānujācārya

With Vivṛti

By

Mahāmahopādhyāya N.S. Ramabhadracharya

Academy of Sanskrit Research

MELKOTE - 571 431

2009

संस्कृत-संशोधन-संसत् ग्रन्थमाला - ५९

भगवद्रामानुजाचार्यविरचितः

नि त्य ग्र न्थः

महामहोपाध्याय एन्.एस्. रामभद्राचार्यैः

विरचितया विवृत्या सहितः

संस्कृत - संशोधन - संसत्

मेलुकोटे - ५७१ ४३१

२००९

My special thanks are due to the members of the Managing Committee for their support and the Government of Karnataka for their timely financial aid without which the Academy could not have undertaken such monumental works.

I am sure the edition will be well received by the Sanskrit Scholarly World and would be used as a useful guide in any of their related research activities.

Bhashyam Swamy

Ist March 2009
Melkote

Dr. Bhashyam Swamy
Director & Joint Secretary

INTRODCTION

Hindu Philosophy mainly believes in Iconic worship of Almighty. Bhagawad Śrī Rāmānujācārya, the saint philosopher is the profounder of the Viśiṣṭādvaita Philosophy, which is a way of life of the followers of Śrīvaiṣṇavism.

By the Divine grace our venerable divines, whom the follower of Viśiṣṭādvaita Philosophy, call as ĀḶWĀRS in their sojourn of the 108 holy places of worship have beautifully sung 4000 hymns (which is popularly known as Āḷwārs' Divya Prabhandams) of VEDA in Dravidian language in the praise of each of the iconic divines in a very simplified way. This is a perfect treasure trove of pious and philosophic thoughts and of household hints on moral conduct and purity of life.

If Swamy Vivekananda could impress upon the westerners about our Indian Advaitic Philosophy, Bhagawad Śrī Rāmānujācārya, has, through his 9 great works (which are also known as 9 gems) beautifully written his commentaries on Viśiṣṭādvaitic Philosophy (which is a way of life) for the benefit of the followers of the way of life.

These are :

i Vedārtha Saṅgraha; - a concise statement of the philosophical doctrines of the Vedas with special reference to important passages in the Upaniṣads;

ii. Gītā Bhāṣya - a commentary on the Bhagavad Gītā;

iii. Śrībhāṣya - the beautiful commentary - a fairly comprehensive commentary on the Vedānta Sūtras which systematically refutes all scholls of thought, heterodox as well as orthodox, other than Viśiṣṭādvaita and forms the locus classicus on this particular branch of Vedānta;

iv. Vedāntadīpa - 'lamp of Vedānta' - a longer commentary but still brief on Vedāntasūtras;

v. Vedāntasāra - a very brief commentary on Vedāntasūtras;

vi. Śaraṇāgātigadya - a prayer in poetic prose, based on unbounded faith in the Lord's grace and describing complete surrender to His Will;

vii. Śrīraṅgagadya - another prayer in poetic prose describing the famous shrine at Śrīraṅgam and the gracious presence of the Lord there as an icon known as Lord Śrīraṅganātha in sleeping posture.

viii. Śrīvaikuṇṭhagadya - yet another prose poem, describing the glories of Heven and the beatitude of salvation; AND

ix. Nityagrantha - a manual of every day worship and devotion.

While Śrī Rāmānuja, elaborates his traits in the other 8 gems he has made this 9th one - Nitya Grantha as a hand book in the form of a manual of every day worship and devotion with a view to enable every devout Śrīvaiṣṇavait

to prepare himself for commencing his daily rituals and routine.

As already said the main path of divine worship by a true follower of Śrīvaiṣṇivismis Iconic worship for seeking salvation. Such being the case he has to follow a chronological and systematic procedures involved in such worship.

While every performer of worship has to get initiation from a chosen Ācārya (Guru) he also needs an authenticated manual to refer. In this direction there can be no other manual than Bhagawad Śrī Rāmānujācārya's Nitya Grantha, which comes as a handy and authoritative manual. This manual is specific and elaborative in so for as enabling the worshiper to follow step by step right from the Suprabhātam - time of wake up till the daily divine worship Bhagawad Ārādhana comes to an end 9 including the procedural aspects of sanctifying the place and utensils used for worship.

By following the manual there can be no doubt in the minds of a true devotee about the divine experiences towards seeking salvation and also the amount of PEACE he derives in his passage of life more than the Mokṣa one seeks after his attaining the lotus feet of Bhagawad Ācārya.

Dr. Prof. Bhashyam Swamy
Director & Joint Secretary

प्रस्तावना

नित्यं भगवतः आराधननिरूपकोऽयं ग्रन्थः नित्यग्रन्थः । भगवदाराधनप्रयोगापरपर्यायोऽयं नित्यग्रन्थः प्रतिनित्यं श्रीवैष्णवैः भगवदाराधनं कथं कर्तव्यम्? इति निरूपयति । **'आराधनानां सर्वेषां विष्णोराराधनं परम्'** इति अभियुक्तोक्तेश्च विष्णोः आराधनं प्रतिदिनं कर्तव्यम् । विष्णुरेव परं तत्वम् । स एव उपेयः, उपायः, मोक्षप्रदश्च । इतीमे विषयाः भगवद्रामानुजाचार्यैः श्रीभाष्यादिग्रन्थेषु विस्तरतया प्रतिपादिताः । श्रीवैष्णवैः प्रपन्नैः आराधनं कथं कर्तव्यम्? नियमाः के? इत्यादि विषयाः समीचिनतया अहिर्बुध्न्य-पाञ्चरात्रादिसंहिताग्रन्थेभ्यः प्रमाणानि आधारीकृत्य भगवद्रामानुजाचार्याः सम्यक् प्रतिपादिताः ।

एतदतिरिच्य भगवदाराधनविषयकाः अनेके ग्रन्थाः अनैकैराचार्यैः विरचिताः वर्तन्ते । ते -

१) एम्बार् गोविन्दार्यैः विरचितः नित्यग्रन्थः ।
२) वङ्गीशेश्वरैः विरचिताः वङ्गीशकारिकाः ।
३) पराशरभट्टार्यैः विरचितः क्रियादीपः ।
४) वेदान्तदेशिकविरचितः नित्यसङ्ग्रहः ।
५) श्रीमद्वरवरमुनिभिः रचितः भगवदाराधनक्रमः ।
६) वादिभीकरार्यैः विरचितः नित्याराधनविधिः ।
७) श्रीमन्नारायणयतीन्द्रविरचितः नित्यग्रन्थः ।

पाञ्चरात्ररक्षाय्यां तृतीयेऽधिकारे वेदान्ताचार्यैः **'अथेदानीं मन्त्रसिद्धान्तोपाख्यपररूपविषयां भोगार्चनमयीमिज्यां भाष्यकारप्रणीत-नित्यग्रन्थविवरणमुखेन व्याख्यास्यामः'** । मन्त्रसिद्धान्ते परिवारभेदस्तु

गुणीभूतमूर्त्यन्तरयोः वैकल्पिकः इति प्रस्तावितत्वात् मन्त्रसिद्धान्तमवलम्ब्य प्रवृत्तो नित्यग्रन्थः इति ज्ञायते । **'जन्तूनां नरजन्म दुर्लभं'** इति न्यायेन दुर्लभं मानुषजन्म प्राप्ते श्रेयसे क्रमयुक्तं भगवदाराधनं कर्तव्यम् । तदुक्तं - पौष्करसंहितायां द्वात्रिंशेऽध्याये - चतुर्मुखः भगवन्तं अस्मान् प्रति एवं प्रार्थितः -

'संसारिणां हि भक्तानां नानाकर्मरतात्मनां ।
पुत्रदारादिभरणे नित्यं व्याकुलचेतसां ।। १२६ ।।
विस्तरेणार्चने तेषां कथं सम्पद्यतेऽच्युत ।
अनर्चनात्त्वयोद्दिष्टफलं वैकल्यमुत्तमम्' ।। १३७ ।।

तदा भगवान् आह -

'क्रमयुक्तं हि यत्कर्म तच्च श्रेयस्करं नृणां ।
तस्मात्तन्न परित्याज्यं संक्षिप्तमथ विस्तृतम् ।। १३८ ।।
विहितं पत्रपुष्पाद्यैस्सभोगैर्वाग्भिरर्चनम्' ।। १३९ ।।

भगवत्कैङ्कर्यरतिः भूत्वा भगवानेव स्वाशेषभूतेन एवं आराधनप्रयोगः क्रमेण वर्णितः - **'अधिकारी परमैकान्ती भूत्वा भगवानेव स्वशेषभूतेन मया स्वकीयैरेव कल्याणतमैः औपचारिक-सांस्पर्शिकाभ्यवहारिकैः भोगैः अखिलपरिजनपरिच्छिदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमते'** इत्यनुसन्धानम् ।

'चतुर्विधा मम जनाः भक्ता एव हि ते श्रुताः ।
तेषामेकान्तिनः श्रेष्ठाः ते चैवानन्यदेवताः' ।।

इति भगवद्वचनात् परमैकान्ती एव श्रेष्ठः । प्रथमं स्नानादि स्नानस्य पूर्वाङ्गं उत्तराङ्गं च तदनुष्ठानं च सम्यक् प्रतिपादितम् । तदनु यागभूमौ

शरणवरणं, यागमुपक्रम्य भूतशुद्धिकरणम्, सात्त्विकत्यागहृद्यागौ, बाह्ययागार्थं अर्घ्यादिपरिकल्पनम्, प्रोक्षणम्, आधारशक्त्यादिसत्करणम्, भगवद्ध्यानयाचने, आवाहनप्रकारः, मन्त्रासनम्, स्नानासनम्, अलङ्कारासनम्, भोज्यासनम्, तदनु अष्टाङ्गप्रणामः इत्यादीन् भगवदाराधनप्रयोगान् पाञ्चरात्रादिग्रन्थान् परिशील्य सम्यक् निरूपितवन्तः ।

अयं ग्रन्थः संसदा भगवद्रामानुजग्रन्थमालानिगमेन प्राकाश्यमानं वर्तते । श्रीमद्भिः महामहोपाध्यायैः नुग्गेहळ्ळि सोमाशियाण्डान् रामभद्राचार्यैः विवृतिं विलिख्य अस्माकं उपकृतवन्तः । दौर्भाग्यवशात् इदानीं अस्माकं मध्ये एते न सन्ति, परमपदे नित्यकैङ्कर्यं प्राप्ताः । तेषामात्मनः शान्तिं प्रार्थयामहे । अस्य ग्रन्थस्य मुद्रणकार्ये सम्पादनकार्ये संसदः, निर्देशकाः सहकार्यदर्शिनश्च श्री उ.वे. भाष्यं स्वामीजीमहोदयाः आवश्यकान् सर्वान् मार्गदर्शनान् प्रदाय अस्मान् प्रोत्साहितवन्तः । तेभ्यः हार्दं कार्तज्ञ्यमर्पयामि । तथा संशोधनसहायकौ विद्वान् एस्. एन्. आनन्दाळवार्, तथा विद्वान् के.एन्. रङ्गप्रियः, गणकयन्त्रकार्यकर्तारः श्री जवरेगौडः, श्रीमती डि.एन्. सौभाग्या, मुद्रणकार्यकर्तारौ श्री के.एस्. बेट्टस्वामिगौडः, श्री जि.एन्. बेट्टेगौडः, मुखपुटविन्यासकारः विद्वान् हेच्.एस्. हनुमन्तरावः, कलाकारः श्री लोकेशः, कार्यालयस्य कुलसचिवः श्री कृष्णप्रसादः, उपकुलसचिवः एस्. कुमारः, अन्येऽन्ये च आवश्यकान् सर्वान् सहकारान् प्रदाय कार्यमेतन्निर्वोढुं महान्तमानुकूल्यमापादितवन्तः इति तेभ्यः कार्तज्ञ्यमर्पयामि । श्रीमान् यदुशैलदीपः यदुगिरिनायिकासमेतः नारायणः प्रसीदतु ।।

विद्वज्जनविधेयः

एस्. नारायणः

विषयसूचनी

श्रीधराय नमः

श्रियै नमः

श्रीमते रामानुजाय नमः

तस्मै रामानुजार्याय नमः परमयोगिने ।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत् ।।

श्रीभगवद्रामानुजाचार्यविरचितः

नित्यग्रन्थः

[भगवदाराधनप्रयोगात्मकः]

श्रीः

श्रीमते रामानुजाय नमः

महामहोपाध्यायैः श्रीरामभद्राचार्यैः विरचिता विवृतिः

नित्यग्रन्थो भगवतो रामानुजगुरोरयम् ।
शब्दसन्दर्भमाश्रित्य संक्षिप्तां विवृतिं त्विह ।।
प्राप्स्यते रामभद्रेण श्रीरङ्गपदसेविना ।
साधूनां परितोषाय प्रसीदन्तु महाजनाः ।।

वेदान्ताचार्यैः पाञ्चरात्ररक्षायां तृतीयेऽधिकारे इज्याविधिमारभ्य, एवं प्रतिज्ञातम् - **अथेदानीं मन्त्रसिद्धान्तोपास्यपररूपविषयां भोगार्चनमयीमिज्यां, भाष्यकारप्रणीतनित्यग्रन्थविवरणमुखेन व्याख्यास्यामः** - इति । अतः यथायथं सः

१. अथ परमैकान्तिनो भगवदाराधनं वक्ष्ये ।। १ ।।

२. भगवत्कैङ्कर्यैकरतिः परमैकान्ती भूत्वा,

३. भगवानेव, स्वशेषभूतेन मया, स्वकीयैरेव कल्याणतमैः औपचारिकसांस्पर्शिकाभ्यवहारिकैः भोगैः, अखिलपरिजन-परिच्छदान्वितं स्वात्मानं प्रीतं कारयितुमुपक्रमते - इत्यनुसन्धाय,

[स्नानादि]

४. तीर्थं गत्वा,

५. शुचौ देशे पादौ प्रक्षाल्य,

६. आचम्य,

७. तीरं संशोध्य,

८. शुचौ देशे मूलमन्त्रेण मृदमादाय, द्विधाकृत्वा, शोधिततीरे निधाय,

९. एकेन अधिकमृद्भागेन देहमलप्रक्षालनं कृत्वा,

१०. निमज्ज्य, आचम्य, प्राणायामत्रयं कृत्वा,

११. आसीनः भगवन्तं ध्यायन्,

ग्रन्थभाग एव उल्लिख्यते । मन्त्रसिद्धान्ते परिवारभेदस्तु गुणीभूत-मूर्त्यन्तरयोर्वैकल्पिकः। तत्र प्रथमम् अधिकारिविशेषे वृत्तवर्त्तिष्यमाणयोः सङ्गतिं दर्शयन्,

कर्मारम्भेण मन्त्रेण प्राप्तं कालमनुस्मरेत् ।
इज्यामेवाऽभिसन्दध्यात् सा योनिः सर्वकर्मणाम् ।।

इति प्रशंसितं चिकीर्षितग्रन्थविषयीभूतम् अहोरात्रकृत्ये प्रधानांशे दर्शयति- **अथ परमैकान्तिनो भगवदाराधनं वक्ष्ये** (परमैकान्ती - **प्रीत्यर्थं वासुदेवस्य कर्मज्ञानादिकं नरः । स विप्रः परमैकान्ती महाभागवतः स्मृतः ।।** प्र.ध.स-परि.प्रकरणे-१०) इति । **अथ** शब्दस्य प्रसिद्धिप्रकर्षसिद्धे आनन्तर्ये सम्भवति, अर्थान्तरपरिग्रहः अनुपपन्नः इति, भाष्यादिषु स्थापितम् ।

१२. अन्यमृद्भागमादाय, वामपाणितले त्रिधाकृत्वा,

१३. पृथक् पृथक् संप्रोक्ष्य, अभिमन्त्र्य,

१४. एकेन दिग्बन्धनम् अस्त्रमन्त्रेण कुर्यात् ।। २ ।।

१५. अन्येन तीर्थस्य पीठम् ।। ३ ।।

१६. इतरेण गात्रानुलेपनम् ।। ४ ।।

१७. ततः पाणी प्रक्षाल्य,

अथ गद्यैः यथावत् प्रपत्तिप्रतिपादनानन्तरं, तत एव तन्निष्ठाधिकारिविशेष-सिद्धिसमनन्तरं (वा) यथावस्थितस्वरूप-रूप-गुण-विभूति-लीलोपकरण-विस्तारमनुसन्धाय, **तमेव शरणमुपगच्छेत्, अखिलेत्यादिना** इति वक्ष्यमाणानुसाराच्च, अत्र तथाविधशरणागतिविषयगद्यग्रन्थस्य पूर्ववृत्तत्वं विवक्षितमिति ज्ञायते ।

न च तत्र **अखिलजगदाधार** इत्यादिमन्त्रपङ्क्तिर्विवक्षिता; तस्याः प्रपत्तिकरणत्वादर्शनात् । यथावस्थितस्वरूपरूपगुणविभूतीनां च गद्य एव प्रपञ्चनात् । **अनन्यशरणस्त्वत्पादारविन्दयुगलं शरणमहं प्रपद्ये** इति च तत्र कण्ठोक्तेः । तस्मात् यथोक्त एवाऽत्र **अथ** शब्दार्थः ।

'परमश्चाऽसौ एकान्तश्चेति परमैकान्तः । सः अस्याऽस्तीति परमैकान्ती' । एकत्र अन्तः - निश्चयः प्राप्यतया प्रापकतया च । तदुभयं सम्भूय परमैकान्तः । 'परमश्चाऽसौ एकान्ती च' इति वा समासः । तत्राऽपि अनन्योपायत्वानन्यप्रयोजनत्वयोः समुच्चयात् पारम्यम् । अनन्योपायत्वं च अनन्यदेवताकत्वपर्यन्तम् ।

यथोक्तम् -

चतुर्विधा मम जनाः भक्ता एव हि ते श्रुताः ।

तेषामेकान्तिनः श्रेष्ठाः ते चैवाऽनन्यदेवताः ।।इति ।(म.भा.शां.प.३२८-३०)

अनन्यप्रयोजनत्वं च - आत्मानन्दानुभवनैरपेक्ष्यपर्यन्तम् । तदप्युक्तम् -

ये तु शिष्टास्त्रयो भक्ताः फलकामा हि ते मताः ।

सर्वे च्यवनधर्माणः प्रतिबुद्धस्तु मोक्षभाक् ।। इति ।

१४. **अस्त्रमन्त्रः** - 'वीर्याय अस्त्राय फट्' ।

१८. उदकाञ्जलिमादाय,

१९. तीर्थस्य अर्घ्यमुत्क्षिप्य,

२०. भगवद्वामपादाङ्गुष्ठविनिस्सृतगङ्गाजलं सङ्कल्पितपीठे आवाह्य,

२१. अर्घ्यं दत्वा,

२२. मूलमन्त्रेणोदकमभिमन्त्र्य, उदकाञ्जलिमादाय,

२३. सप्तकृत्वः अभिमन्त्र्य, स्वमूर्ध्नि सिञ्चेत् ।। ५ ।।

२४. एवं त्रिः, पञ्चकृत्वः, सप्तकृत्वो वा ।। ६ ।।

२५. दक्षिणेन पाणिना जलमादाय, अभिमन्त्र्य, पीत्वाऽऽचम्य,

२६. स्वात्मानं प्रोक्ष्य, परिषिच्य,

२७. तीर्थे निमग्नः भगवत्पादारविन्दविन्यस्तशिरस्कः,

२८. यावच्छक्ति मूलमन्त्रं जपित्वा,

---

१८. **उदकाञ्जलिः** - उदकपूरितोऽञ्जलिः, तौ युतौ अञ्जलिः ।

१९. तीर्थमुद्दिश्य अञ्जलिगतं तीर्थम् ऊर्ध्वं उत्क्षेपणतः समर्प्य ।

२०. गङ्गे आयाहि! इति ।

२१. अर्घ्यार्थमुदकं दत्वा ।

२२. नारायणाष्टाक्षरेण पुरतः स्थितं जलम् ।

२३. अञ्जलिस्थं जलं सप्तवारम् अष्टाक्षरेण अभिमन्त्र्य स्वमूर्ध्नि ।

२४. उदकाञ्जलेः स्वमूर्ध्नि क्षेपः त्रिवारं पञ्चवारं, सप्तवारं वा ।

२५. **पीत्वेति** - बाह्यक्रिया, आचम्येति ।

२६. पुनरुद्धृतेन तीर्थेन स्वदेहं प्रोक्ष्य, शास्त्रीयतया तस्याः परितः सिक्तं कृत्वा ।

२७. मानसं चिन्तनमिदम् ।

२८. मग्न एव सन् श्वासधारणशक्तिमनुसृत्य अष्टाक्षरं जपेत् ।
मूलमन्त्रम् - **ओं नमो नारायणाय** इति । शक्त्यनुगुणसंख्यामवलम्ब्य ।

२९. उत्तीर्य, शुक्लवस्त्रधरः, धृतोत्तरीयः, आचम्य,
३०. ऊर्ध्वपुण्ड्रान् तत्तन्मन्त्रेण धारयित्वा,

२९. जलात् उद्गतः भूमिं प्राप्य । नीलरक्तादिवस्त्रमधारयन् ।
शुक्लवस्त्रधरः -
ब्राह्मणस्य सितं वस्त्रं नृपतेरक्तमुल्बणम् ।
पीतं वैश्यस्य शूद्रस्य नीलम् मलवदिष्यते ।। इति । (प्र.ध.स.अभि.प्र.८२)
धृतोत्तरीयः -
नोत्तरीयमधः कुर्यात् नोपर्याधःस्थमम्बरम् ।
नान्तर्वासो विना जातु निवसेद्वसनं बुधः ।। (प्र.ध.स.अभि.प्र.८२)

३०. (केशवाद्यैः वासुदेवान्तैः त्रयोदशनामभिः) प्रणवादिभिः नमोन्तैः पुण्ड्रान् धारयेत् । अन्ते वासुदेवद्वादशाक्षरेण मूर्ध्नि विन्यसेत् ।
योगो दानं तपो होमः स्वाध्यायः पितृतर्पणम् ।
भस्मीभवति तत्सर्वम् ऊर्ध्वपुण्ड्रं विनाकृतम् ।। (प्र.ध.स.अभि.प्र.८६)
ललाटे केशवं ध्यायेत् नारायणमधोदरे ।
वक्षःस्थले माधवं तु गोविन्दं कण्ठकूवरे ।।
विष्णुं च दक्षिणे कुक्षौ बाहुके मधुसूदनम् ।
त्रिविक्रमं स्कन्धदेशे वामनं वामपार्श्वके ।।
श्रीधरं बाहुमध्ये तु हृषीकेशं तु तद्भुजे ।
पृष्ठे तु पद्मनाभं च त्रिके दामोदरं न्यसेत् ।।
तत्प्रक्षालनतोयेन वासुदेवं च मूर्धनि । (प्र.ध.स.अभि.प्र.८८)

शक्तयः केशवादीनां संप्रोक्ताः परमे पदे ।।
श्रीदेवी प्रथमं नाम द्वितीयममृतोद्भवा ।
तृतीयं कमला प्रोक्ता चतुर्थं चन्द्र(शान्त)शोभिनी ।।
पञ्चमं विष्णुपत्नी च षष्ठं स्याद्वैष्णवी तथा ।
सप्तमं तु वरारोहा अष्टमं हरिवल्लभा ।।
नवमं शाङ्र्गिणी प्रोक्तं दशमं देवदेवकी ।
एकादशं महालक्ष्मीः द्वादशं सुरसुन्दरी ।। इति । (प्र.ध.स.अभि.प्र.८९)

३१. भगवन्तम् अनुस्मृत्य,

३२. तत्तन्मन्त्रेण, भगवत्पर्यन्ताभिधायिना, मूलमन्त्रेण च जलं पीत्वा,

३३. आचम्य, प्रोक्ष्य, परिषिच्य, उदकाञ्जलिं भगवत्पादयोर्निक्षिप्य,

३४. प्राणान् आयम्य, भगवन्तं ध्यात्वा,

३५. अष्टोत्तरशतं मूलमन्त्रमावर्त्य,

३६. परिक्रम्य, नमस्कृत्य, आधारशक्त्यादिपृथिव्यन्तं तर्पयित्वा,

३७. श्रीवैकुण्ठादि पारिषदान्तं तर्पयित्वा,

३८. देवान् ऋषीन् पितॄन् भगवदात्मकान् ध्यात्वा, सन्तर्प्य,

३९. शुचौ देशे वस्त्रं सम्पीड्य, आचम्य,

४०. आवाहिततीर्थं मूलमन्त्रेण आत्मनि समाहृत्य,

४१. यागभूमिं गच्छेत् ।। ७ ।।

---

३१. चतुश्चक्रं नमस्यामीत्यादिभिः ध्यात्वा ।

३२. **अच्युतानन्तगोविन्द** - इति मन्त्रैः नारायणाष्टाक्षरेण च पीत्वा, आचम्य ।

३३. पुनरुदकाञ्जलिमादाय, ध्यानयोर्भगवत्पादयोः तीर्थे एव निक्षिप्य ।

३४. प्राणायामतः ध्यात्वा । **प्राणायामेन पुरुषं ध्यायमाना जनार्दनम्** । (श्री.रा.अ.का.४-३३)

३५. अष्टसंख्योत्तरशतवारं अष्टाक्षरमावर्त्य ।

३६. प्रदक्षिणीकृत्य, तत्रैव अञ्जलिबद्धेन । (अन्यत्र लिखितमास्ते)

३८. **भगवदात्मकान्** - भगवान् आत्मा-व्यापको नियन्ता येषां तान् । **ब्रह्मादयो ये देवाः, तान् देवान् भगवदात्मकान् तर्पयामि** इत्यादि ।

३९. **वस्त्रं**- स्नानकाले धृतं वस्त्रं सम्पीड्य ।

४०. **आवाहिततीर्थं** - गङ्गादि पुण्यतीर्थम् प्रक्षेपतः समाहृत्य ।

४१. **यागभूमिम्** - देवाराधनं भूमिं प्राप्नुयात् ।

[यागभूमौ शरणवरणम्]

४२. सुप्रक्षालितपाणिपादः, स्वाचान्तः,

४३. शुचौ देशे अतिमनोहरे निश्शब्दे भुवं सङ्गृह्य, तां शोषणादिभिर्विशोध्य,

४४. गुरुपरम्परया परमगुरुं भगवन्तमुपगम्य,

४५. तमेव प्राप्यत्वेन, प्रापकत्वेन, अनिष्टनिवारकत्वेन, इष्टप्रापकत्वेन च यथावस्थितस्वरूपरूपगुणविभूतिलीलोपकरणविस्तारम् अनुसन्धाय,

४६. तमेव शरणमुपगच्छेत् 'अखिले'त्यादिना ।। ८ ।।

४७. एवं शरणमुपगम्य, तत्प्रसादोपबृंहितमनोवृत्तिः,

४८. तमेव भगवन्तं सर्वेश्वरेश्वरम्, आत्मनः स्वामित्वेनाऽनुसन्धाय,

४९. अत्यर्थप्रिय-अविरत-विशदतम-प्रत्यक्षरूप अनुध्यानेन ध्यायन्नासीत ।। ९ ।।

---

४२. पाणी पादौ च बहिरागत्य प्रक्षाल्य, द्विराचम्य ।

४३. **सङ्गृह्य** - मनसा निश्चित्य ।

४४. स्वाचार्यप्रभृति श्रियःपतिपर्यन्तं अनुसन्धाय ।

४५. **अनुसन्धाय** - गम्यत्वेन गमकत्वेन भगवत्प्राप्तिविरोधिनिरसनं तदनुकूलघटनं च तस्यैव कार्यमिति तद्वैभवचिन्तनतः विचिन्त्य ।

४६. **शरणमुपगच्छेत्** - मद्यारम्भोक्तवचनेन शरणमुपगच्छेत् ।

४८. भावस्य भगवतः प्रसन्नभावेन समृद्धशरणभावेनोपगतं षड्गुणैश्वर्यप्रभुं परमात्मानं स्वात्मानं प्रति स्वामीति महाहितातिशयभागीति चिन्तयित्वा ।

४९. तदनन्तरं प्राप्तशरणचित्तवृत्तिः आराधकः पूर्णं देवतानामपि दैवतम्, प्रियत्वपराकाष्ठारोहि निरन्तरात्यन्तस्पष्टः प्रत्यक्षपर्यवसायिना धारापन्न ध्यानेन विषयीकुर्वन् अवतिष्ठेत ।

५०. ततः तदनुभवजनितातिमात्रप्रीतिकारितपरिपूर्णकैङ्कर्यरूप-पूजाम् आरभेत ।। १० ।।

[यागमुपक्रम्य भूतशुद्धिकरणम्]

५१. 'भगवानेव स्वनियाम्यस्वरूपस्थितिप्रवृत्तिस्वशेषतैकरसेन अनेनाऽऽत्मना, स्वकीयैश्च देहेन्द्रियान्तःकरणैः, स्वकीयकल्याणतमद्रव्यमयान्, औपचारिकसांस्पर्शिकाभ्य-वहारिकादिसमस्तभोगान्, अतिप्रभूतान्, अतिसमग्रान्, अतिप्रियतमान्, अत्यन्तभक्तिकृतान्, अखिलपरिजन-परिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादयितुम् उपक्रमते' - इत्यनुसन्धाय ।

---

५०. तदनन्तरं तादृशपरमात्मानुभवसम्पन्नात्यन्तप्रीतिवैभवोत्पादितां परिपूर्णकैङ्कर्यादि बाह्यपूजाम् आरभेत ।

५१. करिष्यमाणं पूजाकर्म अलिप्तं यथा भगवति समर्पितं स्यात्, तदर्थं सात्त्विकत्यागाख्यं आदौ करोति-**भगवानेव** प्रतिपादयितुमुपक्रमते इत्यन्वयः । जीवं पूजकं जीवीयानीन्द्रियाणि, पूजोपकरणानि सर्वाणि, विशिनष्टि । अयं पूजकः आत्मा स्वस्वरूपे स्वस्थितौ स्वप्रवृत्तौ स्वशेषतायां च भगवन्नियाम्यताभरेण तदेकरसतापूर्णः, अस्य देहः अन्तर्बाह्याणीन्द्रियाणीमानि, तन्नियामकमन्तःकरणं च करिष्यमाणायां पूजायां करणतामाप्नुवानानि वर्तन्ते । बाह्यानि च पूजोपकरणानि भगवदर्थतानैर्भर्यात् तदीयानि कल्याणतमद्रव्यपूर्णानि सन्ति ।

औपचारिकाः भोगाः - अर्घ्यपाद्याचमनीयादीनि छत्रचामरादीनि च ।

सांस्पर्शिकाः भोगाः - वस्त्रभूषणादयः चन्दनकुसुमादयश्च ।

आभ्यवहारिकाः भोगाः - मृष्टान्न, गुडान्न, दध्यन्नादयः । सर्वानेतान् समृद्धतया अकार्पण्येन सम्पादितान् उपहृतान्, अन्यूनतया आनीय समर्पितान्, भक्तप्रीतिपारवश्येन भगवतोऽप्यत्यन्तप्रियान्, भगवद्व्यतिरिक्तसर्वावस्थचिन्तनेन भगवदेकविश्रान्त सर्वतया अत्यन्तभक्तिकृतान्, अनन्तगरुडादि दिव्यपरिजन, दिव्यास्तरण, दिव्यपरिधानोपबर्हण, दिव्यपर्यङ्कादिपरिच्छदैः भोगोपकरणैः,

५२. स्वदेहे पञ्चोपनिषन्मन्त्रान् संहारक्रमेण न्यस्य,

५३. प्राणायामेनैकेन, दक्षिणेन पाणिना नाभिदेशे मूलमन्त्रं न्यस्य,

५४. मन्त्रोद्धूतचण्डवाय्वाप्यायितनाभिदेशस्थवायुना शरीरम् अन्तर्बहिश्च सर्वतत्वमयं तत्त्वक्रमेण विशोष्य,

समेताय स्वस्मै सर्वशेषिणे स्वगतप्रीत्याख्यधर्मविकसितावस्था सम्पत्तये, सर्वकर्तृभूतः स्वयमेव, प्रतिपादयितुम् - निर्वर्तयितुम् उपक्रमते- प्रारभते-इति प्राथमिकसात्विकत्यागानुसन्धानम् ।

५२. **स्वदेहे** - आराधकस्य देहे,
संहारक्रमेण - सृष्टिक्रमवैपरीत्येन, 'लां नमः, वां नमः, रां नमः, यां नमः, षौं नमः' इति पञ्चोपनिषन्मन्त्राणां संहारक्रमतो न्यासः ।
स्वदेहे इति -

ओं षौं नमः परायेति परमेष्ठ्यात्मने नमः ।
ओं यां नमः परायेति नमोन्तः पुरुषात्मने ।
ओं रां नमः परायेति ततो विश्वात्मने नमः । (अयं सृष्टिक्रमः)
ओं वां नमः परायेति स्यान्निवृत्त्यात्मने नमः ।
ओं लां नमः परायेति ततः सर्वात्मने नमः ।

पञ्चोपनिषदां न्यासात् जायते शक्तिमान् नरः ।
शिरोनासाग्रहृदय गुह्यपादेषु विन्यसेत् ।। (प.भ.क्रियादीपे - P–५३)
(उत्तरत्र अयमेवोच्यते वचनैः)

५३. प्राणायामो विवृतः । नाभिदेशः स्पष्टः । **मूलमन्त्रः** - **ओं नमो नारायणाय** इति । **न्यस्य** - दक्षिणं हस्तं स्पर्शयित्वा मन्त्रमुच्चरन् मन्त्रेति । शरीरस्य समग्रस्य शोषणदाहनप्लावनानि कार्याणीत्याह ।

५४. अत्र वङ्गीशकारिका -
ततो दक्षिणपाण्यन्तः न्यस्य मन्त्रं धियात्मनः ।
तं निदध्यात् स्वनाभ्यन्तः पाणिना प्राणसंयमः ।
तन्मन्त्रतः समुद्धूतैः (यं)शोषणैश्चण्डमारुतैः ।
संशोषयेत् स्वकं देहं प्राचीनैः कर्मभिः सह ।। (वं.का.१११-११२)
तत्वक्रमेण विशोध्येति भूतशुद्धिक्रमः । वायुबीजमन्त्रः ।

५५. पुनः प्राणायामेनैकेन हृद्देशे मूलमन्त्रं न्यस्य,

५६. मन्त्रोद्भूतचक्राग्निज्वालोपबृंहितजाठराग्निना दग्ध्वा तत्तत्समष्टिप्रलीनसर्वतत्त्वसर्वकिल्बिषसर्वाज्ञान तद्वासनो भूत्वा,

५७. भगवद्दक्षिणपादाङ्गुष्ठे मूलमन्त्रेण स्वात्मानं प्रवेशयेत् ।। ११ ।।

५८. अपरेण प्राणायामेन, भगवत्प्रसादेन भगवत्किङ्करत्व-योग्यतामापाद्य,

५९. तस्मादादाय, तद्वामपादाङ्गुष्ठादधस्तात् मूलमन्त्रेणाऽऽत्मानं विन्यस्य,

६०. देववामपादाङ्गुष्ठनखशीतांशुमण्डलाद्गळद्दिव्यामृतरसैः, आत्मानम् अभिषिञ्चेत्,

---

५५. **हृद्देशे** - नाभिदेशादुपरितने द्वादशाङ्गुलप्रदेशे, **मूलमन्त्रम्** - नारायणाष्टाक्षरम् विन्यस्य, **प्राणायामेनैकेन** - प्राणायाममेकं कृत्वा,

५६. **मन्त्रोद्भूतेति** । **रं** - इति अग्निबीजमन्त्रः । **उपबृम्हितः** - वर्धितः ।

चक्राग्निज्वाला - सुदर्शनचक्राग्निज्वाला ।

अथ विन्यस्य हृदये पूर्ववत्पाणिना मनुम् ।

तत उद्भूतचक्राग्निज्वालया दाहयेत्तनुम् ।। (वं.का.११३)

५६. समष्टौ प्रलीनानि सर्वतत्वानि, सर्वकिल्बिषाणि, सर्वाज्ञानानि सर्वावासनांश्च दग्धानि कृत्वेति चिन्तनम् ।

५७. **स्वात्मानम्** - जीवम् प्रविष्टमनुचिन्तयेत् ।

५८. प्राणायामे कैङ्कर्ययोग्यतापादकत्वानुसन्धाय ।

५९. **विन्यस्तम्** - विचिन्त्य ।

६०. **अभिषिक्तम्** - विचिन्त्य ।

६१. एवं आत्मानं अभिषिच्य, भगवत्प्रसादेन तत् अमृतमयं सर्वकैङ्कर्यमनोहरं सर्वकैङ्कर्ययोग्यं शरीरं लब्ध्वा,

६२. तस्मिन् शरीरे पञ्चोपनिषन्मन्त्रान्, सृष्टिक्रमेण विन्यसेत् ।। १२ ।।

६३. 'ओं षौं नमः, पराय परमेष्ठ्यात्मने नमः' - इति मूर्ध्नि स्पृशेत् ।। १३ ।।

६४. 'ओं यां नमः, पराय पुरुषात्मने नमः' - इति नासिकाग्रे ।। १४ ।।

६५. 'ओं रां नमः, पराय विश्वात्मने नमः' इति हृदये ।। १५ ।।

६६. 'ओं वां नमः, पराय निवृत्त्यात्मने नमः' - इति गुह्ये ।। १६ ।।

६७. 'ओं लां नमः, पराय सर्वात्मने नमः' - इति पादयोः ।। १७ ।।

६८. एवं न्यासं कुर्वन्, तत्तच्छक्तिमयम् उद्भूतदेहं ध्यायेत् ।। १८ ।।

६९. पुनरपि प्राणायामेनैकेन देववामपादाङ्गुष्ठविनिस्सृतामृतधारया आत्मानमभिषिच्य,

७०. कृतलाञ्छनो धृतोर्ध्वपुण्ड्रः, भगवद्यागमारभेत ।। १९ ।।

---

६१. **तज्जलं दिव्यममृतं प्रसादात्परमात्मनः ।**
अनघं घनतां गत्वा वपुरस्योपजायते ।। (वं.का.१२५)

६२. आत्मन आकाशः, आकाशाद्वायुः, वायोरग्निः, अग्नेरापः, अद्भ्यः पृथिवी ।

६३.६७.**व्योमनासशिरोमध्यम् वायुर्नासा हृदन्तरम् ।**
हृत्कट्योरन्तरं तेजः जानुकट्यन्तरं जलम् ।
पदजान्वन्तरं भूमिः एवं देहे व्यवस्थितिः ।।

६८. **तच्छक्तिमयम्** - पञ्चशक्तिमयम् । **उद्भूतम्** - प्रासरूपम् ।

६९. **एकेन** -एकं प्राणायामं कृत्वा । **अभिषिक्तं** - विचिन्त्य ।

७०. पुण्ड्रधारणस्थानाङ्कनंकृत्वा, पुण्ड्रधारणं च कृत्वा, भगवत्पूजोपक्रमं कुर्यात् ।
भगवद्यागमारभेत -
घण्टां निनाद्य देवानामागमार्थं च, रक्षसाम् ।
उत्सारणार्थं, भक्तानां सान्निध्याय विशेषतः ।। (एम्बार् स्वामिनां नित्यग्रन्थे -११)

[सात्विकत्यागहृद्यागौ]

७१. 'भगवानेव सर्वं कारयति' इति पूर्ववत् ध्यात्वा, हृद्यागं कृत्वा,

[बाह्ययागार्थं अर्घ्यादिपरिकल्पनम्]

७२. सम्भारान् सम्भृत्य, आत्मनो वामपार्श्वे जलभाजेन तोयमुत्पूर्य,

७३. गन्धपुष्पयुतं कृत्वा, सप्तकृत्वः अभिमन्त्र्य, विशोष्य, दग्ध्वा,

७४. दिव्यामृतमयं तोयमुत्पाद्य, अस्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य,

७५. अन्यानि पूजाद्रव्याणि दक्षिणपार्श्वे निधाय,

७६. आत्मनः पुरस्तात् स्वास्तीर्णे पीठे, क्रमेण आग्नेयादिषु कोणेषु, अर्घ्यपाद्याचमनीयस्नानीयपात्राणि निधाय,

७७. अस्त्रमन्त्रेण प्रक्षाल्य, शोषणादिना पात्राणि विशोध्य,

---

७१. भगवानेव स्व नियाम्येत्यादि । मानसपूजां कृत्वा ।

७२. पूजोपकरणानि योजयित्वा । कुम्भं तीर्थपूरितं कृत्वा ।

७३. निघृष्टं चन्दनं तीर्थे निक्षिप्य, पुष्पाणि च यथोचितं प्रक्षिप्य, अष्टाक्षरेण मन्त्रेणाऽभिमन्त्र्य, **यं** इति वायुबीजेनमन्त्रेण विशोष्य, **रं** इति अग्निबीजेन दग्ध्वा ।

७४. **वीं विरजामावाहयामि** इति विरजानद्यावाहनतः दिव्यामृततोयमुत्पाद्य, **अस्त्राय फट्** इति तीर्थरक्षां कृत्वा, वामदक्षिणाङ्गुल्योः सक्रमं योजनतः **सुरभेः** - धेनोः चतुस्तनमुद्रां तीर्थे प्रदर्श्य ।

७५. तुलसी पुष्पादीनि आराधकस्य स्वस्य दक्षिणे पार्श्वे स्थापयित्वा ।

७६. स्वस्य पुरतः त्रिपदे चतुष्पदेवा सम्यक्स्थापिते पीठे, आग्नेय-नैर्ऋत-वायव्य-ऐशानकोणेषु अर्घ्यं, पाद्यं, आचमनीयं, स्वानीयं च पात्रचतुष्टयं निधाय ।

७७. **अस्त्राय फट्** - इति ।**यं** - वायवे नमः - शोषणं, **रं** - अग्नये नमः - दाहनं, **वं** – अमृताय नमः - प्लावनम् । अपूरितानि पात्राणि **यं रं वं** इति दक्षिणहस्ते, वामहस्ते, दक्षिणहस्ते च ।

७८. संस्कृततोयेन तानि च पूरयित्वा,
७९. अर्घ्यपात्रे - सिद्धार्थक गन्धपुष्पकुशाग्राक्षतादीनि निक्षिपेत् ।। २० ।।
८०. दूर्वां, विष्णुपर्णीं, श्यामाकं, पद्मकम् - पाद्यपात्रे ।। २१ ।।
८१. एला-लवङ्ग-तक्कोल-लामज्जक-जातीपुष्पाणि-आचमनीये ।। २२ ।।
८२. द्वे हरिद्रे, मुराशैलेय-तक्कोल-जटामांसि-मलयज-गन्ध-चम्पकपुष्पाणि-स्नानीये ।। २३ ।।
८३. अन्यस्मिन् पात्रे सर्वार्थतोयं परिकल्प्य,
८४. ततः अर्घ्यपात्रं पाणिना स्पृष्ट्वा, मूलमन्त्रेणाऽभिमन्त्र्य,
८५. 'ओं नमो भगवते अर्घ्यं परिकल्पयामि'-इति, अर्घ्यं परिकल्पयेत् ।। २४ ।।
८६. एवमेव 'पाद्यं परिकल्पयामि' - इति, पाद्यम् ।। २५ ।।
८७. 'आचमनीयं परिकल्पयामि' - इति, आचमनीयम् ।। २६ ।।
८८. 'स्नानीयं परिकल्पयामि' - इति, स्नानीयम् ।। २७ ।।
८९. 'शुद्धोदकं परिकल्पयामि' - इति शुद्धोदकम् ।। २८ ।।

[प्रोक्षणम्]

९०. ततः अर्घ्यजलम् अन्येन पात्रेणादाय, यागभूमिं, सर्वाणि च यागद्रव्याणि, आत्मानं च प्रत्येकं संप्रोक्ष्य, आसनं परिकल्पयेत् ।। २९ ।।

[आधारशक्त्यादिसत्करणम्]

९१. १. 'ओं. आधारशक्त्यै नमः'
२. 'ओं प्रकृत्यै नमः'

---

७८. **संस्कृतेन तोयेन** - विरजावाहनतः । कोणगतानि पात्राणि पूरयित्वा ।
७९. **कुशाग्रम्** - दर्भाग्रम् । **अक्षताः** - तण्डुलाः ।
८३. **सर्वार्थतोयपात्रं** - शुद्धोदकपात्रं नान्यत् ।
९०. **अन्येन पात्रेण** - उद्धरण्यादिना । **मन्त्रासनं समर्पयामि** इति तुलसीपुष्पादि समर्पयेत् ।
९१. आसनपरिकल्पनप्रकार एवायम् ।

३. 'ओं अखिलजगदाधाराय कूर्मरूपिणे नारायणाय नमः'

४. 'ओं भगवते अनन्ताय नागराजाय नमः'

५. 'ओं भूं भूम्यै नमः'

९२. इति यथास्थानम् उपर्युपरि ध्यात्वा प्रणम्य,

९३. ६. 'ओं श्रीवैकुण्ठाय दिव्यलोकाय नमः' - इति दिव्यलोकं प्रणम्य,

९४. ७. 'ओं श्रीवैकुण्ठाय दिव्यजनपदाय नमः' - इति दिव्यजनपदं प्रणम्य,

९५. ८. 'ओं श्रीवैकुण्ठाय दिव्यनगराय नमः' - इति दिव्यनगरं प्रणम्य,

९६. ९. 'ओं. श्रीवैकुण्ठाय दिव्यविमानाय नमः' - इति दिव्यविमानं प्रणम्य,

९७. १०. 'ओं आनन्दमयाय दिव्यमण्टपरत्नाय नमः' - इति मण्टपरत्नम् प्रणम्य,

९८. तस्मिन् -

११. 'ओं अनन्ताय नमः' इति आस्तरणं प्रणम्य,

९९. तस्मिन्नुपरि -

१२. 'ओं धर्माय नमः' इति आग्नेय्यां पादं विन्यस्य,

१३. 'ओं ज्ञानाय नमः' - इति नैर्ऋत्याम्,

१४. 'ओं वैराग्याय नमः' - इति वायव्याम्,

१५. 'ओं ऐश्वर्याय नमः' - इति ऐशान्याम्,

१००. १६. 'ओं अधर्माय नमः' - इति प्राच्यां पीठगात्रं विन्यस्य,

१७. 'ओं अज्ञानाय नमः' - इति दक्षिणस्याम्,

१८. 'ओं अवैराग्याय नमः' - इति प्रतीच्याम्,

१९. 'ओं अनैश्वर्याय नमः' - इति उत्तरस्याम्,

१०१. एभिः परिच्छिन्नतनुं, पीठभूतं सदात्मकम् अनन्तं विन्यस्य,

१०२. पश्चात् सर्वकार्योन्मुखं विभुमनन्तम्,

२०. 'ओं अनन्ताय नमः' इति विन्यस्य,

१०३. तस्मिन्नुपरि -

२१. 'ओं पद्माय नमः' - इति पद्मं विन्यस्य,

१०४. तत्पूर्वपत्रे -

२२. 'ओं विमलायै (चामरहस्तायै) नमः' - इति विमलां चामरहस्तां विन्यस्य,

१०५. तत आरभ्य प्रादक्षिण्येन ऐशानान्तं पत्रेषु -

२३. 'ओं उत्कर्षिण्यै चामरहस्तायै नमः'

२४. 'ओं ज्ञानायै चामरहस्तायै नमः'

२५. 'ओं क्रियायै चामरहस्तायै नमः'

२६. 'ओं योगायै चामरहस्तायै नमः'

२७. 'ओं प्रभ्व्यै(ह्व्यै) चामरहस्तायै नमः'

२८. 'ओं सत्यायै चामरहस्तायै नमः'

२९. 'ओं ईशानायै चामरहस्तायै नमः'

इति अष्टशक्तीः चामरहस्ताः विन्यस्य,

१०६. ३०. 'ओं अनुग्रहायै चामरहस्तायै नमः'

इति कर्णिकापूर्वभागे अनुग्रहां चामरहस्तां विन्यसेत्।

१०७. ३१. 'ओं जगत्प्रकृतये योगपीठाय नमः' इति योगपीठं सङ्कल्प्य,

१०८. ३२. 'ओं दिव्याय योगपर्यङ्काय नमः' - इति दिव्ययोगपर्यङ्कं विन्यस्य,

---

१०१. **अनन्तम्** - शेषम् ।

१०४. **विमलाद्याः** - चामरहस्तानां नामानि ।

१०९. तस्मिन् अनन्तं नागराजं सहस्रफणाशोभितम्,
३३. 'ओं अनन्ताय नागराजाय नमः' - इति विन्यस्य,

११०. ३४. 'ओं अनन्ताय नमः' इति पुरस्तात् पादपीठं - विन्यस्य,

१११. सर्वाणि आधारशक्त्यादीनि पीठान्तानि तत्त्वानि प्रत्येकं गन्ध-पुष्प-धूप-दीपैः सम्पूज्य,

११२. सर्वपरिवाराणां तत्तत्स्थानेषु पद्मासनानि सङ्कल्प्य,

११३. अनन्त-गरुड-विष्वक्सेनानां सपीठकं पद्मं विन्यस्य,

११४. सर्वतः पुष्पाक्षतादीनि विकीर्य,

११५. योगपीठस्य पश्चिमोत्तरदिग्भागे -
३५. 'ओं अस्मत् गुरुभ्यो नमः' - इति गुरून् गन्ध-पुष्प-धूप-दीपैः अभ्यर्च्य,

११६. प्रणम्य, अनुज्ञाप्य, भगवद्यागमारभेत ।। ३०।।

[भगवध्यानयाचने]

११७. कल्पिते नागभोगे समासीनम्, भगवन्तं नारायणम्, पुण्डरीकदलामलायताक्षम्, किरीटहारकेयूरकटकादि-सर्वभूषणैर्भूषितम्, आकुञ्चितदक्षिणपादम्, प्रसारितवामपादं जानुन्यस्त-प्रसारितदक्षिणभुजम्, नागभोगे विन्यस्तवामभुजम्, ऊर्ध्वभुजद्वयेन शङ्खचक्रधरम्, सर्वेषां सृष्टि-स्थिति-प्रलयहेतुभूतम्, अञ्जनाभम्, कौस्तुभेन विराजमानम्, चकासतम्, उदग्रप्रबुद्धस्फुरदपूर्वाचिन्त्यपरमसत्त्वपञ्चशक्तिमयविग्रहं, पञ्चोपनिषदैः ध्यात्वा,

---

११६. गुरवस्तदीयगुरवो दिशन्तु मम साध्वनुग्रहम् ।
युष्मदुपजनित शक्तिमतिः हरिमर्चयामि गतभीः प्रसीदत ।। (प्र.ध.स.इ.प्र.२१२)

११८. 'आराधनाभिमुखो भव' - इति मूलमन्त्रेण प्रार्थ्य,

११९. मूलमन्त्रेण दण्डवत्प्रणम्य, उत्थाय, स्वागतं निवेद्य,

१२०. यावदाराधनसमाप्तिसान्निध्ययाचनं कुर्यात् ।। ३१ ।।

[क्वाचित्कावाहनप्रकारः]

१२१. अन्यत्र स्वाभिमते देशे पूजा चेत्, एवमावाहनम् -

'मन्त्रयोगः समाह्वानं करपुष्पोपदर्शनम् ।
बिम्बोपवेशनं चैव योगविग्रहचिन्तनम् ।।
प्रणामश्च समुत्थानं स्वागतं पुष्पमेव च ।
सान्निध्ययाचनं चेति तत्राऽऽह्वानस्य सत्क्रियाः' ।। इति ।। ३२ ।।

१२२. ततो भगवन्तं प्रणम्य,

१२३. दक्षिणतः - १. 'ओं श्रीं श्रियै नमः' इति श्रियमावाह्य, प्रणम्य,

१२४. वामे - २. 'ओं भूं भूम्यै नमः'- इति मन्त्रेण भुवमावाह्य,

१२५ तत्रैव - ३. 'ओं नीं नीलायै नमः'- इति नीलामावाह्य,

१२६. ४. 'ओं किरीटाय मकुटाधिपतये नमः'- इति उपरि भगवतः पश्चिमपार्श्वे - चतुर्भुजं चतुर्वक्त्रं कृताञ्जलिपुटं, मूर्ध्नि भगवत्किरीटं धारयन्तं किरीटाख्यदिव्यभूषणं प्रणम्य,

---

११९. स्वागतम् - स्वागतं भगवन्नद्य मां तारयितुमागतः ।
धन्योस्म्यनुगृहीतोऽस्मि कृतार्थोऽस्मि कृपानिधे ।।

१२०. विग्रहाराधनम् - यावदाराधनपरिसमाप्ति सन्निधत्स्व! इह विग्रहे इति अत्र स्थाने इति वा ।

१२७. एवमेव- ५. 'ओं किरीटमालायै आपीडात्मने नमः'- इति आपीडकं तत्रैव पुरस्तात् प्रणम्य,

१२८. ६. 'ओं दक्षिणकुण्डलाय मकरात्मने नमः'- इति दक्षिणकुण्डलं दक्षिणतः प्रणम्य,

१२९. ७. 'ओं वामकुण्डलाय मकरात्मने नमः'- इति वामकुण्डलं वामतः प्रणम्य,

१३०. ८. 'ओं वैं वैजयन्त्यै वनमालायै नमः'- इति वैजयन्तीं पुरतः प्रणम्य,

१३१. ९. 'ओं श्रीमत्तुलस्यै नमः'- इति तुलसीं देवीं पुरस्तात् प्रणम्य,

१३२. १०. 'ओं श्रीवत्साय श्रीनिवासाय नमः'- इति श्रीवत्सं पुरतः प्रणम्य,

१३३. ११. 'ओं हाराय सर्वाभरणाधिपतये नमः'- इति हारं पुरतः प्रणम्य,

१३४. १२. 'ओं श्री कौस्तुभाय सर्वरत्नाधिपतये नमः'- इति श्रीकौस्तुभं सर्वरत्नाधिपतिं पुरतः प्रणम्य,

१३५. १३. 'ओं काञ्चीगुणोज्ज्वलाय दिव्यपीताम्बराय नमः'- इति पीताम्बरं पुरतः प्रणम्य,

१३६. १४. 'ओं सर्वेभ्यो भगवद्भूषणेभ्यो नमः' इति सर्वभूषणानि सर्वतः प्रणम्य,

१३७. १५. 'ओं श्रीसुदर्शनाय हेतिराजाय नमः' इति सुदर्शनात्मानं, रक्तवर्णं, रक्तनेत्रं, (द्वि) चतुर्भुजं कृताञ्जलिपुटं भगवन्तम् आलोकयन्तं तद्दर्शनानन्दोपबृंहितमुखं, मूर्ध्नि भगवच्चक्रं धारयन्तं दक्षिणतः प्रणम्य,

१३८. १६. तत्रैव - 'ओं नन्दकाय खड्गाधिपतये नमः'- इति नन्दकात्मानं शिरसि भगवत्खड्गं धारयन्तं प्रणम्य,

१३९. १७. 'ओं पद्माय नमः' इति पद्मात्मानं शिरसि पद्मं धारयन्तं प्रणम्य,

१४०. १८. 'ओं पाञ्चजन्याय शङ्खाधिपतये नमः'- इति शङ्खात्मानं श्वेतवर्णं रक्तनेत्रं द्विभुजं कृताञ्जलिपुटं शिरसि शङ्खं धारयन्तं वामतः प्रणम्य-तत्रैव,

१४१. १९. 'ओं कौमोदक्यै गदाधिपतये नमः'- इति गदां देवीं प्रणम्य,

१४२. २०. तत्रैव - 'ओं शार्ङ्गाय चापाधिपतये नमः'- इति शार्ङ्गात्मानं प्रणम्य,

१४३. २१. 'ओं सर्वेभ्यो भगवद्दिव्यायुधेभ्यो नमः'- इति सर्वाणि भगवदायुधानि परितः प्रणम्य,

१४४. २२. 'ओं सर्वाभ्यो भगवत्पादारविन्दसंवाहिनीभ्यो नमः' - इति दिव्यपादारविन्दसंवाहिनीः समन्ततः प्रणम्य,

१४५. २३. ('ओं सर्वेभ्यो भगवत्परिचारकेभ्यो नमः' इति भगवत्परिचारकान् प्रणम्य, 'ओं सर्वाभ्यो भगवत्परिचारिकाभ्यो नमः' इति भगवत्परिचारिकाः प्रणम्य) 'ओं अनन्ताय नागराजाय नमः'- इति पृष्ठतः अनन्तं नागराजं (भगवन्तं) चतुर्भुजं हलमुसलधरं कृताञ्जलिपुटं फणामणिसहस्रमण्डितोत्तमाङ्गं, भगवद्दर्शनानन्दबृम्हितसर्वाङ्गं ध्यात्वा, प्रणम्य,

१४६. २४. 'ओं सर्वेभ्यो भगवत्परिजनेभ्यो नमः'- इति अनुक्त अनन्तपरिजनान् समन्ततः प्रणम्य,

१४७. २५. 'ओं भगवत्पादुकाभ्यां नमः'- इति भगवत्पादुके पुरतः प्रणम्य,

१४८. २६. 'ओं सर्वेभ्यो भगवत्परिच्छदेभ्यो नमः'- इति सर्वपरिच्छदान् समन्ततः प्रणम्य,

१४९. २७. 'ओं वैं वैनतेयाय नमः'- इति अग्रतः भगवतः भगवन्तं वैनतेयमासीनं द्विभुजं कृताञ्जलिपुटं ध्यात्वा, प्रणम्य,

१५०. २८. 'ओं श्रीमते विष्वक्सेनाय नमः'- इति भगवतः प्रागुत्तरपार्श्वे, दक्षिणाभिमुखं भगवन्तं विष्वक्सेनमासीनं चतुर्भुजं, शङ्खचक्रधरं, नीलमेघनिभं ध्यात्वा, प्रणम्य,

१५१. २९. 'ओं गं गजाननाय नमः'

३०. 'ओं जं जयत्सेनाय नमः'

३१. 'ओं हं हरिवक्त्राय नमः'

३२. 'ओं कं कालप्रकृतिसंज्ञाय नमः'

३३. 'ओं सर्वेभ्यो श्री विष्वक्सेनपरिजनेभ्यो नमः'- इति श्री विष्वक्सेनपरिजनान् प्रणम्य,

१५२. ३४. 'ओं चण्डाय द्वारपालाय नमः'

३५. 'ओं प्रचण्डाय द्वारपालाय नमः' इति पूर्वद्वारपार्श्वयोः प्रणम्य,

१५३. ३६. 'ओं भद्राय द्वारपालाय नमः'

३७. 'ओं सुभद्राय द्वारपालाय नमः' इति दक्षिणद्वारपार्श्वयोः प्रणम्य,

१५४. ३८. 'ओं जयाय द्वारपालाय नमः'

३९. 'ओं विजयाय द्वारपालाय नमः'- इति पश्चिमद्वारपार्श्वयोः प्रणम्य,

१५५. ४०. 'ओं धात्रे द्वारपालाय नमः'

४१. 'ओं विधात्रे द्वारपालाय नमः'- इति उत्तरद्वारपार्श्वयोः प्रणमेत् ।। ३४ ।।

१५६. एते द्वारपालाः सर्वे शङ्खचक्रगदाधराः आज्ञामुद्राधराः ध्यातव्याः ।। ३५ ।।

१५७. ४२. 'ओं सर्वेभ्यो द्वारपालेभ्यो नमः'- इति सर्वद्वारेषु सर्वद्वारपालान् प्रणम्य,

१५८. ४३. 'ओं कुमुदाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः'-इति, पूर्वस्यां दिशि, पार्षदेश्वरं कुमुदं प्रणम्य,

१५९. ४४. 'ओं कुमुदाक्षाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः'- इति आग्नेय्यां, कुमुदाक्षं प्रणम्य,

१६०. ४५ 'ओं पुण्डरीकाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः' इति, दक्षिणस्यां पुण्डरीकं प्रणम्य,

१६१. ४६. 'ओं वामनाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः' इति, नैर्ऋत्यां वामनं प्रणम्य,

१६२. ४७. 'ओं शङ्कुकर्णाय गणाधिपतये सवाहनपरिवार-प्रहरणाय नमः' इति, पश्चिमायां शङ्कुकर्णं प्रणम्य,

१६३. ४८. 'ओं सर्पनेत्राय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः' इति, वायव्यां सर्पनेत्रं प्रणम्य,

१६४. ४९. 'ओं सुमुखाय गणाधिपतये सवाहनपरिवारप्रहरणाय नमः' इति, उदीच्यां सुमुखं प्रणम्य,

१६५. ५०. 'ओं सुप्रतिष्ठिताय गणाधिपतये सवाहनपरिवार-प्रहरणाय नमः' इति, ऐशान्यां सुप्रतिष्ठितं प्रणम्य,

१६६. ५१. 'ओं सर्वेभ्यो भगवत्पार्षदेभ्यो नमः' इति, सर्वस्माद्बहिः प्रणमेत् ।। ३६ ।।

१६७. १. अन्यत्रावाह्य पूजायाम्, आवाहनस्थानानि-परमव्योम-क्षीरार्णव-आदित्यमण्डलहृदयानि, मथुराद्वारकागोकुला-योध्यादीनि दिव्यावतारस्थानानि चान्यानि, पौराणिकानि श्रीरङ्गादीनि च यथारुचि ।। ३७ ।।

१६७. २. एवं भगवन्तं नारायणं देवीभूषणायुध-परिजन-परिच्छद-द्वारपालपार्षदैः सेव्यमानं, स्वाधीनत्रिविधचेतनाचेतन-

---

१६६. सर्वस्माद्बहिः - भगवत्पूजास्थानात् बहिः ।

स्वरूपस्थिति-प्रवृत्तिभेदं, क्लेशकर्माद्यशेष-दोषासंस्पृष्टं, स्वाभाविकानवधिकातिशय-ज्ञानबलैश्वर्य-वीर्यशक्तितेजः-प्रभृत्यसङ्ख्येय-कल्याणगुणगणौघमहार्णवं ध्यात्वा, प्रणम्य,

१६८. मूलमन्त्रेण स्वात्मानं देवाय निवेद्य,

१६९. प्रणम्य, अनुज्ञाप्य, भगवत्पूजामारभेत ।। ३८ ।।

[मन्त्रासनम्]

१७०. पात्रेण (उद्धरिण्या) पूर्वस्थितात् अर्घ्यपात्रात् अर्घ्यजलमादाय, पाणिभ्यां घ्राण(मुख)सममुद्धृत्य,

१७१. 'भगवन्! इदं प्रतिगृह्णीष्व' इति चिन्तयन् भगवन्मुखे दर्शयित्वा,

१७२. भगवद्दक्षिणहस्ते किञ्चित्प्रदाय अर्घ्यं, प्रतिग्रहपात्रे प्रक्षिपेत् ।। ३९ ।।

१७३. हस्तौ प्रक्षाल्य, पादयोः पुष्पाणि समर्प्य,

१७४. पाद्यपात्रात् पाद्यजलमादाय, पादयोः किञ्चित्समर्प्य, मनसा पादौ प्रक्षालयन्, पाद्यं प्रतिग्रहपात्रे निक्षिपेत् ।। ४० ।।

१७५. हस्तौ प्रक्षाल्य, वस्त्रेण पादौ संमृज्य, गन्ध-पुष्पाणि दत्वा,

१७६. आचमनीयपात्रात् आचमनीयमादाय, भगवद्दक्षिणहस्ते किञ्चित् समर्प्य, 'भगवद्वदने आचमनीयं समर्पितम्' इति मनसा भावयन्, शेषम् आचमनीयं प्रतिग्रहपात्रे प्रक्षिपेत् ।। ४१ ।।

१७७. ततः गन्ध-पुष्प-धूप-दीप-आचमन-मुखवास-ताम्बूलादि निवेदनं कृत्वा, प्रणम्य,

---

१६८. **मूलमन्त्रेण** - नारायणाष्टाक्षरेण ।

१७२. **प्रतिग्रहपात्रम्** - पात्रमिदम् । **षट्पात्राणि** -अर्घ्य-पाद्य-आचमनीय-स्नानीय-सर्वार्थतोय-प्रतिग्रहपात्रेति षट् पात्राणि ।

१७३. **हस्तौ** - स्व हस्तौ । **पादयोः** - भगवच्चरणयोः ।

१७५. **वस्त्रेण** - शोधकेन वस्त्रेण ।

१७८. **निवेदनम्** - **मां मदीयं च निखिलं चेतनाचेतनात्मकम् ।**
स्व कैंकर्योपकरणं वरद! स्वीकुरु स्वयम् ।। (न्यास.द.७)

१७८. 'आत्मानम् आत्मीयं च सर्वं, भगवन्! नित्यकिङ्करत्वाय स्वीकुरु' इति भगवते निवेदयेत् ।। ४२ ।।

[स्नानासनम्]

१७९. ततः स्नानार्थमासनं आनीय, गन्धादिभिरभ्यर्च्य, भगवन्तं प्रणम्य, अनुज्ञाप्य, पादुके प्रदाय,

१८०. तत्रोपविष्टे - माल्यभूषणवस्त्राण्यपनीय, विष्वक्सेनाय दत्वा,

१८१. स्नानशाटिकां प्रदाय,

१८२. अर्घ्यपाद्याचमनीय-पादपीठप्रदान-दन्तकाष्ठ-जिह्वानिर्लेहन-गण्डूष-मुखप्रक्षालन-आचमनादर्शप्रदर्शन-हस्तप्रक्षालन-मुखवास-ताम्बूल-तैलाभ्यङ्गोद्वर्तन-आमलकतोय-कंकत-प्लोतदेहशोधन-शाटिकाप्रदान-हरिद्रालेपन-प्रक्षालन-वस्त्रोत्तरीय-यज्ञोपवीतप्रदान-पाद्याचमन-पवित्रप्रदान-गन्ध-पुष्प-धूप-दीपाचमन-नृत्तगीत-वाद्यादि-सर्वमङ्गलसंयुक्त-अभिषेक-नीराजनाचमन-देहशोधन-प्लोतवस्त्रोत्तरीय-यज्ञोपवीत-आचमन-कूर्चप्रसारण-सहस्त्रधाराभिषेक-नीराजनाचमन-देहशोधन-प्लोतवस्त्रोत्तरीय-यज्ञोपवीताचमनानि दद्यात् ।। ४३ ।।

[अलङ्कारासनम्]

१८३. ततः अलङ्कारासनमभ्यर्च्य, प्रणम्य, अनुज्ञाप्य,

१८४. पादुके प्रदाय, तत्रोपविष्टे -

१८५. पूर्ववत् स्नानीयवर्ज्यम् अर्घ्यपाद्याचमनीयशुद्धोदकानि मन्त्रेण कल्पयित्वा,

१८६. भगवते अर्घ्यपाद्याचमनीयानि दत्वा,

१८७. गन्धपुष्पपादसम्मर्दनवस्त्रोत्तरीयभूषणोपवीत-अर्घ्य-पाद्य-आचमनीयानि दत्वा,

---

१८०. **तत्रोपविष्टे**- स्नानासने ।

१८१. **स्नानशाटिका** - स्नानार्थं वस्त्रम् ।

१८८. समस्तपरिवाराणां स्नानवस्त्रादिभूषणान्तं दत्वा,
१८९. गन्धादीन् देवानन्तरं सर्वपरिवाराणां प्रत्येकं प्रदाय,
१९०. धूपदीपाचमनान्तं दद्यात् ।। ४४ ।।
१९१. अथवा सर्वपरिवाराणां गन्धादीनेव दद्यात् ।। ४५ ।।
१९२. गन्ध-पुष्प-प्रदानालङ्कार-अञ्जनोर्ध्वपुण्ड्रादर्श-धूप-दीपाचमन-ध्वज-छत्र-चामर-वाहन-शङ्ख-चिह्नकाहल-भेर्यादि सकलनृत्तगीतवाद्यादिभिः अभ्यर्च्य,
१९३. मूलमन्त्रेण पुष्पं प्रदाय, प्रत्यक्षरं पुष्पं प्रदाय,
१९४. द्वादशाक्षरेण विष्णुषडक्षरेण विष्णुगायत्र्या पञ्चोपनिषदैः पुरुषसूक्तऋग्भिः पुष्पं प्रदाय, अन्यैश्च भगवन्मन्त्रैः शक्तश्चेत् पुष्पं प्रदाय,
१९५. देव्यादि दिव्यपारिषदान्तं तत्तन्मन्त्रेण पुष्पं दत्वा, प्रणम्य,
१९६. प्रतिदिशं प्रदक्षिणप्रणामपूर्वकं भगवते पुष्पाञ्जलिं दत्वा, पुरतः प्रणम्य,
१९७. श्रुतिसुखैः स्तोत्रैः स्तुत्वा,
१९८. स्वात्मानं नित्यकिङ्करतया निवेद्य, तथैव ध्यात्वा,
१९९. यथाशक्ति मूलमन्त्रं जपित्वा,
२००. सर्वभोगप्रपूरणीं मात्रां दत्वा,
२०१. मुखवास-ताम्बूले प्रदाय, अर्घ्यं दत्वा,

---

१९२. चिह्नकाहल - भगवच्चिन्हभूतं काहलम् ।

१९३. मन्त्रासनम् ।

१९४. अर्चनम् ।

१९८. ध्यात्वा - त्वच्छेषत्वे स्थिरधियं त्वत्प्राप्त्येकप्रयोजनम् ।
निषिद्धकाम्यरहितं कुरु मां नित्यकिङ्करम् ।। (न्यास.द.५)

१९९. मूलमन्त्रम् - अष्टाक्षरमन्त्रम् ।

[भोज्यासनम्]

२०२. भोज्यासनमभ्यर्च्य, प्रणम्य, अनुज्ञाप्य, पादुके प्रदाय,
२०३. तत्रोपविष्टे - पाद्याचमनीयार्हणीयानि दत्वा,
२०४. गुडं, माक्षिकं , सर्पिः, दधि, क्षीरं चेति पात्रे निक्षिप्य,
२०५. शोषणादिभिर्विशोध्य, अर्घ्यजलेन सम्प्रोक्ष्य, मधुपर्कम्,
२०६. अवनतशिराः हर्षोत्फुल्लनयनः हृष्टमनाः भूत्वा प्रदाय,
२०७. आचमनीयं दद्यात् ।। ४६ ।।
२०८. यत्किञ्चिद्द्रव्यं भगवते देयम्; तत्सर्वं शोषणादिभिर्विशोध्य, अर्घ्यजलेन सम्प्रोक्ष्य दद्यात् ।। ४७ ।।
२०९. ततश्च गां स्वर्णरत्नादिकं च यथाशक्ति दद्यात् ।। ४८ ।।
२१०. ततः सुसंस्कृतान्नम् आज्याढ्यं दधिक्षीरमधूनि च फलमूलव्यञ्जनानि मोदकांश्च अन्यानि च लोके प्रियतमानि, आत्मनश्च इष्टानि, शास्त्र अविरुद्धानि सम्भृत्य,
२११. शोषणादिकृत्वा, अर्घ्यजलेन सम्प्रोक्ष्य,
२१२. अस्त्रमन्त्रेण रक्षां कृत्वा, सुरभिमुद्रां प्रदर्श्य,
२१३. अर्हणपूर्वकं हविर्निवेदयेत् ।। ४९ ।।
२१४. 'अतिप्रभूतम् अतिसमग्रम् अतिप्रियतमम् अत्यन्तभक्तिकृतम्, इदं स्वीकुरु' इति प्रणामपूर्वकम्, अत्यन्तसाध्वसविनयावनतो भूत्वा, निवेदयेत् ।। ५० ।।
२१५. ततश्च अनुपानतर्पणे प्रदाय,
२१६. हस्तप्रक्षालन-आचमन-हस्तसम्मार्जन-चन्दन-मुखवास-ताम्बूलादीनि दत्वा,

२१५. अनुपानम् - मधुरशीतलनारिकेलोदकपानकादि ।
तर्पणम् - तृप्तिकरं तीर्थं प्रदानम् (देवस्य दक्षिणे हस्ते) ।

२१७. प्रणम्य, पुनः मन्त्रासनं कूर्चेन मार्जयित्वा,

२१८. अभ्यर्च्य, अनुज्ञाप्य, पादुके प्रदाय,

२१९. तत्रोपविष्टे - माल्यादिकम् अपोह्य, विष्वक्सेनाय दत्वा,

२२०. पाद्याचमन-गन्ध-पुष्प-धूप-दीपाचमन-अपूप-फलादीनि दत्वा,

२२१. मुखवास-ताम्बूल-नृत्तगीत-वाद्यादिभिः अभ्यर्च्य,

२२२. प्रदक्षिणीकृत्य, दण्डवत् प्रणम्य,

२२३. पर्यङ्कासनमभ्यर्च्य, अनुज्ञाप्य, पादुके प्रदाय,

२२४. तत्रोपविष्टे - पाद्याचमने दत्वा,

२२५. माल्यभूषणवस्त्राण्यपनीय, विष्वक्सेनाय दत्वा,

२२६. सुखशयनोचितं सुखस्पर्शञ्च वासः, तदुचितानि भूषणानि, उपवीतं च प्रदाय,

२२७. आचमनीयं दत्वा,

२२८. गन्ध-पुष्प-दीपाचमन-मुखवास-ताम्बूलादिभिरभ्यर्च्य,

२२९. श्रुतिसुखैः स्तोत्रैः अभिष्टूय,

२३०. 'भगवानेव स्वनियाम्य-स्वरूपस्थितिप्रवृत्ति-स्वशेषतैकरसेन-अनेनात्मना, स्वकीयैश्च देहेन्द्रियान्तःकरणैः, स्वकीय-कल्याणतमद्रव्यमयान्, औपचारिक-सांस्पर्शिक-आभ्यवहारिकादिसमस्तभोगान्, अतिप्रभूतान्, अतिसमग्रान्, अतिप्रियतमान्, अत्यन्तभक्तिकृतान्,अखिलपरिजन-परिच्छदान्विताय स्वस्मै स्वप्रीतये स्वयमेव प्रतिपादितवान्'-इत्यनुसन्धाय,

२३१. भगवन्तमनुज्ञाप्य,

---

२२२. प्रदक्षिणीकृत्य- प्रदक्षिणद्वयं कृत्वा ।

२२९ अभिष्टूय - स्तुत्वा ।

२३२. भगवन्निवेदितहविश्शेषात् विष्वक्सेनाय किञ्चिदुद्धृत्य, निधाय,
२३३. अन्यत्सर्वं स्वाचार्यप्रमुखेभ्यो वैष्णवेभ्यो प्रदाय,
२३४. भगवद्यागावशिष्टैः जलादिभिः द्रव्यैः विष्वक्सेनमभ्यर्च्य,
२३५. पूर्वोद्धृतं हविश्च दत्वा, तदर्चनं परिसमाप्य,
२३६. भगवन्तम् अष्टाङ्गेन प्रणम्य, शरणमुपगच्छेत् ।। ३१ ।।

'मनोबुद्ध्यभिमानेन सह न्यस्य धरातले ।
कूर्मवच्चतुरः पादान् शिरस्तत्रैव पञ्चमम् ।।
प्रदक्षिणसमेतेन त्वेवं रूपेण सर्वदा ।
अष्टाङ्गेन नमस्कृत्य ह्युपविश्याग्रतः विभोः' ।।

इत्युक्तः अष्टाङ्गप्रणामः । शरणागतिप्रकारश्च पूर्वोक्तः ।

२३७. ततः अर्घ्यजलं प्रदाय, भगवन्तमनुज्ञाप्य, पूजां समापयेत् ।। ३२ ।।

इति श्रीभगवद्रामानुजाचार्यविरचितः
नित्यग्रन्थः
(भगवदाराधनप्रयोगात्मकः)
समाप्तः

१३६. अष्टाङ्गप्रणामः - **उरसा शिरसा चैव वपुषा मनसा गिरः ।**
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग उच्यते ।।

श्रीमद्रामानुजार्येण नित्यग्रन्थः प्रकाशितः ।
तस्य अध्येतृलाभाय टिप्पण्येषा सुयोजिता ।।
क्रतुनाथार्यवंश्येन रामभद्रविपश्चिता ।
श्रीहरिः प्रीयतां तेन विद्यारूपी जनार्दनः ।।

।। श्रीमते रामानुजाय नमः ।।

अ नु ब न्धः

१. सङ्केताक्षरसूचनी
२. ग्रन्थसूचनी
३. मुक्तकश्लोकाः
४. गुरुपरम्परा

सङ्केताक्षरसूचनी

श्री.रा.अ.का. - श्रीरामायणम् अरण्यकाण्डम् ।

म.भा.शां.प. - महाभारतशान्तिपर्व ।

प.भ.क्रि.दी. - पराशरभट्टारकीयक्रियादीपः ।

न्यास.द. - न्यासदशकम् ।

वं.का. - वङ्गीशकारिका ।

प्र.ध.स.अ.प्र. - प्रपन्नधर्मसारसमुच्चये अभिगमनप्रकरणम् ।

प्र.ध.स.इ.प्र. - प्रपन्नधर्मसारसमुच्चये इज्याप्रकरणम् ।

प्र.ध.स.प.प्र. - प्रपन्नधर्मसारसमुच्चये परिभाषाप्रकरणम् ।

❋ ❋ ❋

ग्रन्थसूचनी

श्रीभगवद्रमानुजग्रन्थमाला -

सम्पादनम् - श्री कञ्ची प्र.भ. अण्णङ्गराचार्येण ।

प्रकाशकः - श्रीमद्वरवरमुनीन्द्रषट्छताब्दीमहोत्सवस्मारक सदाचार्य-सूक्तिमाला - १९७१ ।

रक्षाग्रन्थाः - श्रीभगवद्रामानुजीय नित्यग्रन्थसहिता ।

ग्रन्थपरिष्करणम् - श्री उत्तमूरु वीरराघवाचार्यैः । मुद्रणम् - १९६९ ।

प्रपन्नधर्मसारसमुच्चयः -

कर्ता - श्री वङ्गीशवंशेश्वरः श्रीवैकुण्ठदीक्षिताचार्यः ।

पुनर्परिष्करणम् - तूप्पल् वेङ्कटाचार्यदासः ।

नित्यग्रन्थः - (श्रीभगवद्रामानुजविरचित नित्यग्रन्थः, एम्बार् (गोविन्दार्य)रचित नित्यग्रन्थः, पराशरभट्टारकीय क्रियादीपः, श्रीमद्वरवरमुनिप्रणीत भगवदाराधनक्रमः, श्रीवादिभीकरार्यरचित नित्याराधनविधिः, तथा श्रीमन्नारायणयतीन्द्रविरचित नित्यग्रन्थसहितः) ।

मुक्तकश्लोकाः

[भगवन्निवेदनसमये अनुसन्धेयश्लोकाः]

या प्रीतिर्विदुरार्पिते मधुरिपो! कुन्त्यर्पिते यादृशी
या गोवर्धनमूर्ध्नि या च पृथुके स्तन्ये यशोदार्पिते ।
भारद्वाजसमर्पिते शबरिकादत्ते कुचेलार्पिते
या प्रीतिर्मुनिपत्निभक्त्युपहृते अत्रापि तां तां कुरु ।।

स्कन्दमूलफलोदग्रं काले काले चतुर्विधम् ।
सूपापूपघृतक्षीरशर्करासहितं हविः ।।

घनसारशिरोदग्रं क्रमुकाष्टदळैस्सह ।
विमलानि च ताम्बूलि दळानि स्वीकुरु प्रभो! ।।

असत्यं अशुचिं नीचं अपराधैकभाजनम्
अल्पशक्तिं अचैतन्यं अनर्हं भृत्यकर्मणि ।
दोषाकरं दुरात्मानं मामेव परिचिन्तयन्
मत्समर्पितमित्येतत् न त्वमर्हस्युपेक्षितम् ।।

अतिप्रभूतमत्यन्तभक्तिस्नेहोपपादितम्
शुद्धं सर्वगुणोपेतं सर्वदोषविवर्जितम् ।
स्वानुरूपं विशेषेण स्वदेव्यो सदृशं गुणैः
त्वमेवेदं हविः प्रीत्या स्वीकुरुष्व सुरेश्वर! ।।

।। श्री कृष्णार्पणमस्तु ।।

गुरुपरम्परा

१. अस्मद्गुरुभ्यो नमः
२. अस्मत्परमगुरुभ्यो नमः
३. अस्मत्सर्वगुरुभ्यो नमः
४. श्रीमते रामानुजाय नमः
५. श्रीपराङ्कुशदासाय नमः
६. श्रीमद्यामुनमुनये नमः
७. श्रीराममिश्राय नमः
८. श्रीपुण्डरीकाक्षाय नमः
९. श्रीमन्नाथमुनये नमः
१०. श्रीमते शठकोपाय नमः
११. श्रीमते विष्वक्सेनाय नमः
१२. श्रियै नमः
१३. श्रीधराय नमः

"अस्मद्देशिकमस्मदीयपरमाचार्यानशेषान् गुरून्
श्रीमल्लक्ष्मणयोगिपुङ्गवमहापूर्णौ मुनिं यामुनम् ।
रामं पद्मविलोचनं मुनिवरं नाथं शठद्वेषिणं
सेनेशं श्रियमिन्दिरासहचरं नारायणं संश्रये" ।।

[ध्यानश्लोकः]

"कूर्मादीन् दिव्यलोकं तदनुमणिमयं मण्टपं तत्र शेषम्
तस्मिन् धर्माधिपीठं तदुपरि कमलं चामरग्राहिणीश्च ।
विष्णुं देवीर्विभूषायुधगणमुरगं पादुके वैनतेयम्
सेनेशं द्वारपालान् कुमुदमुखगणान् विष्णुभक्तान् प्रपद्ये" ।।



Academy of Sanskrit Research

Melkote 571 431, Mandya Dist.,
Karnataka. INDIA

Tel : +91-8236-299841
Tele fax : +91-8236-299981
Email : asrbng@vsnl.com,

"Bridging the gap from the past to future through the present"

सम्पादनमण्डली

प्रधानसम्पादकः

डा.प्रो. भाष्यम् स्वामी एम्.ए. पिहेच्.डि., डि.लिट्

निर्देशकः सहकार्यदर्शी च, संस्कृत-संशोधन-संसत्, मेलुकोटे

सम्पादकः

महामहोपाध्याय विद्वान् एन्.एस्. रामभद्राचार्यः

(प्राचीन-नवीन-न्यायालङ्कारविद्वान्, अधीतवेदवेदान्तः)

संशोधनसहायकौ

विद्वान् एस्. नारायणः, *एम्.ए. (संस्कृत), एम्.ए. (कन्नड)*

विद्वान् एस्.एन् आनन्दाळवार्

विशिष्टाद्वैतवेदान्तविद्वान्

तान्त्रिकसहायकाः

श्री जवरेगौडः

श्रीमती डि. एन्. सौभाग्या

श्री के.एस्. बेट्टस्वामिगौडः

श्री जि.एन्. बेट्टेगौडः

Fore Word

Śrīvaiṣṇavism, one of the earliest cults found in Hindu Pantheon, has to its legacy the tradition of Ācāryas and Āḷwārs. Ācāryas have written commentaries on various Sanskrit texts right from Śrutis, Upaniṣads, Bhagavadgītā, and Vedāntasūtras. Āḷwārs hailing from South have composed "Divyaprabandhams" as these are their heart-felt devotional outpourings for the Lord. Hence Śrīvaiṣṇavism has held its special position in terms of its long history but as well as its popularity.

Bhagavad Rāmānuja who propounded the school of Viśiṣṭādvaita, develops his trait by taking cues from preceding Ācāryas and Āḷwārs. He has not only produced profound scholastic works, at the same time laid down specific daily routines for a devout Śrīvaiṣṇava. This being the topic of "Nitya Grantha" there are regimens ought to be followed by a devotee of Viṣṇu.

This work containing many dictums, begins with a dictum of appropriate time of wake up for Śrīvaiṣṇava to taking sacred ablution to cleansing of articles of worship, eventually closing on the completion of worship. In between there is a detail account of procedural ways of worship, offerings to be made at the worship and so on.

This hand-book of Ācārya Rāmānuja hand-holds every devotee of Viṣṇu in his daily worship of the Lord,

that which gives every joy not only here but also here after.

The Academy is delighted in presenting this needy book to the readers.

Thanks are due to Late Vidwān Mahāmahopādhyāya N.S. Ramabhadracharya for his splendid editing and offering invaluable footnotes to this work.

I wish to express my sincere thanks to Vidwān S.Narayana; the Research Officer, Vidwān S.N. Anandlwar, Junior Research Assistant, and Vidwān K.N. Rangapriya Junior Research Assistant for their rich contribution by bringing this critical edition in a record time.

I would like to thank the team of Mr. Lokesh - the Artist designer including Vid H.S. Hanumantha Rao, the Granthapala of the Academy for having brought out unique and effective cover page designs for this edition. Appreciations are also due to the team of DTP & in-house print division consisting of M/s Javare Gowda, Smt. D.N. Sowbhagya, K.S. Betta Swamy Gowda & G.N. Betta Gowda.

I will be failing in my duty if I don't thank our President, Sri G. Kumar Naik, I.A.S., the formar Secretary cum Treasurer, Sri Chakravarthi Mohan, I.A.S., and Present Secretary cum Treasurer Sri P. Maheswar Rao I.A.S., for their source of inspiration and support and also to my beloved colleagues - the Registrar Sri B.S. Krishna Prasad & the Asst. Registrar Sri S. Kumar and all the staff who have directly or indirectly contributed in this endeavor. Thanks are also due to the Binder - Mr. Prasanna of Mysore.